श्रीप्रमेयरत्नावली

Version .9

बलदेवविद्याभूषणविरचिता
edited
by
Neal Delmonico

September 14, 2001

Contents

Chapter 1

भगवत्पारतम्यम्

जयति श्रीगोविन्दो गोपीनाथः स मदनगोपालः ।
वक्ष्यामि यस्य कृपया प्रमेयरत्नावलीं सूक्ष्माम् ॥ १ ॥

भक्त्याभासेनापि तोषं दधाने
धर्माध्यक्षे विश्वनिस्तारिनाम्नि ।
नित्यानन्दाद्वैतचैतन्यरूपे
तत्त्वे तस्मिन्नित्यमास्तां रतिर्नः ॥ २ ॥

आनन्दतीर्थनामा सुखमयधामा यतिर्जीयात् ।
संसारार्णवतरणिं यमिह जनाः कीर्तयन्ति बुधाः ॥ ३ ॥

भवति विचिन्त्या विदुषां
निरवकरा गुरुपरम्परा नित्यम् ।
एकान्तित्वं सिध्यति ययो-
दयति येन हरितोषः ॥ ४ ॥

यदुक्तं पद्मपुराणे :

सम्प्रदायविहीना ये मन्त्रास्ते विफला मताः
अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः ।
श्रीब्रह्मरुद्रसनका वैष्णवाः क्षितिपावनाः
चत्वारस्ते कलौ भाव्या ह्युत्कले पुरुषोत्तमात् ॥ (क) ॥

रामानुजं श्रीः स्वीचक्रे मध्वाचार्यं चतुर्मुखः ।
श्रीविष्णुस्वामिनं रुद्रो निम्बादित्यं चतुःसनः ॥ (ख) ॥

तत्र स्वगुरुपरम्परा यथाः

श्रीकृष्णब्रह्मदेवर्षिबादरायणसंज्ञकान् ।
श्रीमध्वश्रीपद्मनाभश्रीमन्नृहरिमाधवान् ॥
अक्षोभ्यजयतीर्थश्रीज्ञानसिन्धुदयानिधीन् ।
श्रीविद्यानिधिराजेन्द्रजयधर्मान् क्रमाद्वयम् ॥
पुरुषोत्तमब्रह्मण्यव्यासतीर्थांश्च संस्तुमः ।
ततो लक्ष्मीपतिं श्रीमन्माधवेन्द्रं च भक्तितः ॥
तच्छिष्यान् श्रीश्वराद्वैतनित्यानन्दान् जगद्गुरून् ॥
देवमीश्वरशिष्यं श्रीचैतन्यञ्च भजामहे ।
श्रीकृष्णप्रेमदानेन येन निस्तारितं जगत् ॥ (ग) ॥

अथ प्रमेयाण्युद्दिश्यन्तेः

श्रीमध्वः प्राह विष्णुं परतममखिलाम्नायवेद्यञ्च विश्वं
सत्यं भेदञ्च जीवान् हरिचरणजुषस्तारतम्यञ्च तेषाम् ।
मोक्षं विष्णवङ्घ्रिलाभं तदमलभजनं तस्य हेतुं प्रमाणं
प्रत्यक्षादित्रयं चेत्युपदिशति हरिः कृष्णचैतन्यचन्द्रः ॥ ५ ॥

तत्र श्रीविष्णोः परमत्वं यथा श्रीगोपालोपनिषदिः

तस्मात् कृष्ण एव परो देवस्तं ध्यायेत्तं रसेत्तं भजेत्तं यजेत् ॥
(क) ॥

श्वेताश्वतरोपनिषदि चः

ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्याभिध्यानात्तृतीयं देहभेदे
विश्वैश्वर्यं केवलमाप्तकामः ॥ (ख) ॥ (श्वे. उ., १.११)

एतज्ज्ञेयं नित्यमेवात्मसस्थं

नातः परं वेदितव्यं हि किञ्चित् ॥ (ग) ॥
(श्वे. उ., १.१२)

श्रीगीतासु च:

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ॥ (घ) ॥ (भ. गी., ३.३)

**हेतुत्वाद्विभुचैतन्यानन्दत्वादिगुणाश्रयात् ।
नित्यलक्ष्म्यादिमत्त्वाच्च कृष्णः परतमो मतः ॥६ ॥**

तत्र सर्वहेतुत्वं यथाहुः श्वेताश्वतराः:

एकः स देवो भगवान् वरेण्यो
योनिस्वभावानधितिष्ठत्येकः ॥ (क) ॥ (श्वे. उ., ५.४)

यच्च स्वभावं पचति विश्वयोनिः
पाच्यांश्च सर्वान् परिणामयेद्यः ॥ (ख) ॥ (श्वे. उ., ५.५)

विभुचैतन्यानन्दत्वं यथा काठके:

महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ (ग) ॥ (क. उ., ४.४)

**विज्ञानसुखरूपत्वमात्मशब्देन बोध्यते ।
अनेन मुक्तगम्यत्वव्यूत्पत्तेरिति तद्विदः ॥७ ॥**

वाजसनेयिनश्चाहुः:

विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम् ॥ (क) ॥ (बृ. उ., ३.९.२८.७)

श्रीगोपालोपनिषदि च:

तमेकं गोविन्दं सच्चिदानन्दविग्रहम् ॥ (ख) ॥

मूर्तत्वं प्रतिपत्तव्यं चित्सुखस्यैव रागवत् ।
विज्ञानघनशब्दादिकीर्तनाच्चापि तस्य तत् ।
देहदेहिभिदा नास्तीत्येतेनैवोपदर्शितम् ॥ ८ ॥

मूर्तत्वस्यैव विभुत्वं यथा श्वेताश्वतरोपनिषदि:

वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्
तेनेदं पूर्णं पुरुषेण सर्वम् ॥ (क) ॥ (श्वे. उ., ३.९)

द्युस्थोऽपि निखिलव्यापीत्याख्यानान्मूर्तिमान् विभुः ।
युगपद्ध्यातृवृन्देषु साक्षात्काराच्च तादृशः ॥ ९ ॥

श्रीदशमे च:

न चान्तर्बहिर्यस्य न पूर्वं नापि चापरम् ।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः ॥
तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम् ।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा ॥ (क) ॥ (भा. पु., १०.९.१३-१४)

श्रीगीतासु च:

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभातानि न चाहं तेष्ववस्थितः ॥ (भ. गी., ९.४)

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥ (ख) ॥ (भ. गी., ९.५)

अनन्त्या शक्तिरस्तीशे योगशब्देन योच्यते ।
विरोधभञ्जिका सा स्यादिति तत्त्वविदां मतम् ॥१० ॥

आदिना सर्वज्ञत्वं यथा मुण्डके:

यः सर्वज्ञः सर्ववित् ॥ (क) ॥ (मु. उ., १.१.९, २.२.७)

आनन्दित्वं च तैत्तिरीयके:

आनन्दं ब्रह्मणो विद्वान्न विभेति कुतश्चन ॥ (ख) ॥ (तै. उ., २.९.१)

प्रभुत्वसुहृत्त्वज्ञानदत्वमोचकत्वानि च श्वेताश्वतरश्रुतौ:

सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत् ॥ (ग) ॥ (श्वे. उ., ३.१७)

प्रज्ञा च तस्मात् प्रसृता पुराणी ॥ (घ) ॥ (श्वे. उ., ४.१४)

संसारमोक्षस्थितिबन्धहेतुः ॥ (ङ) ॥ (श्वे. उ., ६.१६)

माधुर्यञ्च श्रीगोपालोपनिषदि:

सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् ।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥ (च) ॥ (गो. ता. उ., पूर्व १०)

न भिन्ना धर्मिणो धर्मा भेदभानं विशेषतः ।
यस्मात् कालः सर्वदास्तीत्यादिधीर्विदुषामपि ॥११ ॥

एवमुक्तं नारदपञ्चरात्रे:

निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो
निश्चेतनात्मकशरीरगुणैश्च हीनः ।
आनन्दमात्रकरपादमुखोदरादिः
सर्वत्र च स्वगतभेदविवर्जितात्मा ॥ (क) ॥

अथ नित्यलक्ष्मीकत्वं यथा विष्णुपुराणे:

नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥ (ख) ॥

विष्णोः स्युः शक्तयस्तिस्रस्तासु या कीर्तिता परा ।
सैव श्रीस्तदभिन्नेति प्राह शिष्यान् प्रभुर्महान् ॥१२ ॥

तत्र त्रिशक्तिर्विष्णुः यथा श्वेताश्वतरोपनिषदि:

परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ॥ (क) ॥

प्रधानक्षेत्रज्ञपतिर्गुणेशः ॥ (ख) ॥

श्रीविष्णुपुराणे च:

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा ।
अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ॥ (ग) ॥ (वि. पु., ६.७.६१)

परैव विष्ण्वभिन्ना श्रीरित्युक्तं तत्रैव (वि. पु., १.९.४४-४५):

कलाकाष्ठानिमेषादिकालसूत्रस्य गोचरे ।
यस्य शक्तिर्न शुद्धस्य प्रसीदतु स नो हरिः ॥
प्रोच्यते परमेशो यः यः शुद्धोऽप्युपचारतः ।
प्रसीदतु स नो विष्णुरात्मा यः सर्वदेहिनाम् ॥ (घ) ॥

एषा परैव त्रिवृदित्यप्युक्तं तत्रैव (वि. पु., १.१२.६९)

ह्लादिनी सन्धिनी संवित्त्वय्येका सर्वसंश्रये ।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥१२ए ॥

एकोऽपि विष्णुरेकापि लक्ष्मीस्तदनपायिनी ।
स्वसिद्धैर्बहुभिर्वेशैर्बहुरित्यभिधीयते ॥१३ ॥

तत्रैकत्वे सत्येव विष्णोर्बहुत्वं, यथा श्रीगोपालोपनिषदि (गो. ता. उ., पूर्व २०):

एको वशी सर्वगः कृष्ण ईड्य
एकोऽपि सन् बहुधा योऽवभाति ।
तं पीठस्थं ये तु यजन्ति धीरास्
तेषां सुखं शाश्वतं नेतरेषाम् ॥ (क) ॥

अथ लक्ष्म्यास्तद् यथा:

परास्य शक्तिर्विविधैव श्रूयते ॥ (ख) ॥ (श्वे. उ., ६.८)

पूर्तिः सार्वत्रिकी यद्यप्यविशेषा तथापि हि ।
तारतम्यञ्च तच्छक्तिव्यक्त्यव्यक्तिकृतं भवेत् ॥१४ ॥

तत्र विष्णोः सार्वत्रिकी पूर्तिर्यथा वाजसनेयके (बृ. उ., ५.१.१):

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ (क) ॥

महावाराहे च:

सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः ।
हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ॥
परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वतः ।
सर्वे सर्वगुणैः पूर्णाः सर्वदोषविवर्जिताः ॥ (ख) ॥

अथ श्रियः सा यथा श्रीविष्णुपुराणे (वि. पु., १.९.१४०-१४३):

एवं यथा जगत्स्वामी देवदेवो जनार्दनः ।
अवतारं करोत्येष तथा श्रीस्तद्सहायिनी ॥
पुनश्च पद्मादुद्भूता आदित्योऽभूद्यदा हरिः ।
यदा च भार्गवो रामस्तदाभूद्धरणी त्वियम् ॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषा सहायिनी ॥
देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम् ॥ (ग) ॥

स्यात् स्वरूपसती पूर्तिरिहैक्यादिति विन्मतम् ॥१५ ॥

अथ तथापि तारतम्यम्

तत्र श्रीविष्णोस्तद् यथा श्रीभागवते (भा. पु., १.३.२८):

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ॥ (क) ॥

अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ॥ इति च ॥ (ख) ॥ (भा. पु., ९.२४.५५)

अथ श्रियस्तद् यथा पुरुषबोधिन्यामथर्वोपनिषदि:

गोकुलाख्ये माथुरमण्डल इत्युपक्रम्य द्वे पार्श्वे चन्द्रावली राधिका चेत्यभिधाय परत्र यस्या अंशे लक्ष्मीदुर्गादिका शक्तिरिति ॥ (ग) ॥

गौतमीयतन्त्रे च:

देवी कृष्णमयी प्रोक्ता राधिका परदेवता ।
सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा ॥ (घ) ॥

अथ नित्यधामत्वमादिशब्दात्, यथा छान्दोग्ये (छा. उ., ७.२४.१):

स भगवः कस्मिन् प्रतिष्ठित इति ।
स्वे महिम्नीति ॥ (ङ) ॥

दिव्ये ब्रह्मपुरे ह्येष संव्योम्न्यात्मा प्रतिष्ठित इति च ॥ (मु. उ., २.२.७) ॥ (च) ॥

ऋक्षु च (ऋग् वेद, १.१५४.६):

ता वां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः
परमं पदमवभाति भूरि ॥ (छ) ॥

श्रीगोपालोपनिषदि च (गो. ता. उ., उत्तर ३५):

तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी हि ॥ (ज) ॥

जितन्ते स्तोत्रे च:

लोकं वैकुण्ठनामानं दिव्यषाड्गुण्यसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥
नित्यसिद्धैः समाकीर्णं तन्मयैः पाञ्चकालिकैः ।
सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभम् ॥
वापीकूपतडागैश्च वृक्षषण्डैः सुमण्डितम् ।
अप्राकृतं सुरैर्वन्द्यमयुतार्कसमप्रभम् ॥ इति ॥ (झ) ॥

ब्रह्मसंहितायां च (ब्र. सं., ५.२):

सहस्रपत्रं कमलं गोकुलाख्यं महत्पदं ।
तत्कर्णिकारं तद्धाम तदनन्तांशसम्भवम् ॥ इति ॥ (ञ) ॥

प्रपञ्चे स्वात्मकं लोकमवतार्य महेश्वरः ।
आविर्भवति तत्रेति मतं ब्रह्मादिशब्दतः ॥१६ ॥
गोविन्दे सच्चिदानन्दे नरदारकता यथा ।
अज्ञैर्निरूप्यते तद्वद्धाम्नि प्राकृतता किल ॥१७ ॥

अथ नित्यलीलत्वं च, तथाहि श्रुतिः (बृह्. आ. उ., ३.८.३):

यद्भतं भवच्च भविष्यच्च ॥ (क) ॥

एको देवो नित्यलीलानुरक्तो
भक्तव्यापी भक्तहृद्यन्तरात्मा ॥ (ख) ॥

स्मृतिश्च (भ. गी., ४.९):

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ (ग) ॥

रूपानन्त्याज्जनानन्त्याद्धामानन्त्याच्च कर्म तत् ।
नित्यं स्यात्तदभेदाच्चेत्युदितं तत्त्ववित्तमैः ॥१८ ॥

इति प्रमेयरत्नावल्यां भगवत्पारतम्यप्रकरणं नाम प्रथमप्रमेयम् ॥१

Chapter 2

अखिलाम्नायवेद्यत्वम्

अथाखिलाम्नायवेद्यत्वं

यथा श्रीगोपालोपनिषदि (गो.ता.उ., उत्तर २७):

योऽसौ सर्वैर्वेदैर्गीयते ॥ इति ॥ (ग) ॥

काठके च (क. उ., १.२.१५):

सर्वे वेदा यत्पदमामनन्ति
तपांसि सर्वाणि च यद्वदन्ति ॥ इति ॥ (ख) ॥

श्रीहरिवंशे च:

वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते ॥ इति ॥ (ग) ॥

साक्षात्परम्पराभ्यां वेदा गायन्ति माधवं सर्वे ।
वेदान्ताः किल साक्षादपरे तेभ्यः परम्परया ॥ १ ॥

क्वचित् क्वचिदवाच्यत्वं यद्वेदेषु विलोक्यते ।
कार्त्स्न्येन वाच्यं न भवेदिति स्यात्तत्र सङ्गतिः ।
अन्यथा तु तदारम्भो व्यर्थः स्यादिति मे मतिः ॥ २ ॥

शब्दप्रवृत्तिहेतूनां जात्यादीनामभावतः ।
ब्रह्म निर्धर्मकं वाच्यं नैवेत्याहुर्विपश्चितः ॥ ३ ॥
सर्वैः शब्दैरवाच्ये तु लक्षणा न भवेदतः ।
लक्ष्यञ्च न भवेद् धर्महीनं ब्रह्मेति मे मतम् ॥ ४ ॥

इति प्रमेयरत्नावल्यं अखिलाम्नायवेद्यत्वप्रकरणं नाम द्वितीयप्रमेयम् ॥ १

Chapter 3

विश्वसत्यत्वम्

स्वशक्त्या सृष्टवान् विष्णुर्यथार्थं सर्वविज्जगत् ।
इत्युक्तेः सत्यमेवैतद्वैराग्यार्थमसद्वचः ॥१ ॥

तथाहि श्वेताश्वतरोपनिषदि ('स्वे. उ., ४.१)

य एकोऽवर्णो बहुधा शक्तियोगाद्
वर्णाननेकान्निहितार्थो दधाति ॥इति ॥ (क) ॥

श्रीविष्णुपुराणे च (वि.पु., १.२२.५४):

एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥इति ॥ (ख) ॥

ईशावास्योपनिषदि (ई. उ., ८):

स पर्यगाच्छुक्रमकायमव्रणम्
अस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्
याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ इति ॥ (ग) ॥

श्रीविष्णुपुराणे च (वि. पु., १.२२.५८):

तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥ इति ॥ (घ) ॥

महाभारते च (म. भा., अश्वमेध ३५.३४):

ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः ।
सत्याद्भूतानि जातानि सत्यं भूतमयं जगत् ॥ इति ॥ (ङ) ॥

**आत्मा वा इदमित्यादौ वनलीनविहङ्गवत् ।
सत्त्वं विश्वस्य मन्तव्यमित्युक्तं वेदवेदिभिः ॥ २ ॥**

इति प्रमेयरत्नावल्यं विश्वसत्यत्वप्रकरणं नाम तृतीयप्रमेयम् ॥ १

Chapter 4

भेदसत्यत्वम्

अथ विष्णुतो जीवानां भेदः ।

तथाहि श्वेताश्वतराः पठन्ति (श्वे. उ., ४.६):

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषष्वजाते ।
तयोरन्यः पिप्पलं स्वाद्व-
त्त्यनश्नन्नन्यो ऽभिचाकशीति ॥ (क) ॥

समाने वृक्षे पुरुषो निमग्नो
ऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशम्
अस्य महिमानमिति वीतशोकः ॥ (ख) ॥ (मु. उ., ३.१.२)

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्तौ च लिङ्गं तात्पर्यनिर्णये ॥
इति तात्पर्यलिङ्गानि षड्यान्याहुर्मनीषिणः ।
भेदे तानि प्रतीयन्ते तेनासौ तस्य गोचरः ॥१ ॥

किंच मुण्डके (मु. उ., ३.१.३):

यदा पश्यः पश्यते रुक्मवर्णं

कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति ॥ (क) ॥

काठके च (क. उ., ४.१.१४):

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ॥ (ख) ॥

श्रीगीतासु च (भ. गी., १४.२):

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ (ग) ॥

एषु मोक्षेऽपि भेदोक्तेः स्याद्भेदः पारमार्थिकः ।
ब्रह्माहमेको जीवोऽस्मि नान्ये जीवा न चेश्वरः ॥ २ ॥
मदविद्याकल्पितास्ते स्युरितीत्थं च दूषितम् ।
अन्यथा नित्य इत्यादिश्रुत्यर्थो नोपपद्यते ॥ ३ ॥

तथाहि कठाः पठन्ति (क. उ., २.२.१३):

नित्यो नित्यानां चेतनश्चेतनानाम्
एको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्
तेषां शान्तिः शाश्वती नेतरेषाम् ॥ (क) ॥

एकस्मादीश्वरान्नित्याच्चेतनात्तादृशा मिथः ।
भिद्यन्ते बहवो जीवास्तेन भेदः सनातनः ॥ ४ ॥
प्राणैकाधीनवृत्तित्वाद् वागादेः प्राणता यथा ।
तथा ब्रह्माधीनवृत्तेर्जगतो ब्रह्मतोच्यते ॥ ५ ॥

तथाहि छान्दोग्ये पठ्यते (छा. उ., ५.१.१५):

न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते
प्राण इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवन्ति ॥ (क) ॥

ब्रह्मव्याप्यत्वतः कैश्चिज्जगद् ब्रह्मेति मन्यते ॥ ६ ॥

यदुक्तं श्रीविष्णुपुराणे (वि. पु., १.९.६९):

योऽयं तवागतो देव समीपं देवतागणः ।
सत्यमेव जगत्स्रष्टा यतः सर्वगतो भवान् ॥ (क) ॥

प्रतिबिम्बपरिच्छेदपक्षौ यौ स्वीकृतौ परैः ।
विभुत्वाविषयत्वाभ्यां तौ विद्वद्भिर्निराकृतौ ॥ ७ ॥

अद्वैतं ब्रह्मणो भिन्नमभिन्नं वा त्वयोच्यते ।
आद्ये द्वैतापत्तेरन्ते सिद्धसाधनताश्रुतेः ॥ ८ ॥

अलीकं निर्गुणं ब्रह्म प्रमाणाविषयत्वतः ।
श्रद्देयं विदुषां नैवेत्यूचिरे तत्त्ववादिनः ॥ ९ ॥

इति प्रमेयरत्नावल्यां भेदसत्यत्वप्रकरणं नाम चतुर्थप्रमेयम् ॥ १

Chapter 5

जीवानां भगवद्दासत्वम्

अथ जीवानां भगवद्दासत्वम् ।

तथाहि श्वेताश्वतराः पठन्ति (श्वे. उ., ६.७):

तमीश्वराणां परमं महेश्वरं
तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ताद्
विदाम देवं भुवनेशमीड्यम् ॥ (क) ॥

स्मृतिश्च

ब्रह्मा शम्भुस्तथैवार्कश्चन्द्रमाश्च शतक्रतुः ।
एवमाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा ॥ इत्याद्या ॥
सब्रह्मकाः सरुद्राश्च सेन्द्रा देवा महर्षिभिः ।
अर्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिम् ॥ इति च (ख) ॥

पाद्मे च जीवलक्षणे:

दासभूतो हरेरेव नान्यस्यैव कदाचन ॥ (ग) ॥

इति प्रमेयरत्नावल्यां जीवानां भगवद्दासत्वप्रकरणं नाम पञ्चमप्रमेयम् ॥१

Chapter 6

जीवतारतम्यं

अथ जीवानां तारतम्यम्ः

अणुचैतन्यरूपत्वज्ञानित्वाद्यविशेषतः ।
साम्ये सत्यपि जीवानां तारतम्यञ्च साधनात् ॥१ ॥

तत्राणुत्वमुक्तं श्वेताश्वतरैः (श्वे. उ., ५.९):

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ (क) ॥

चैतन्यरूपत्वं ज्ञानित्वादिकञ्च षट्प्रश्न्यां (प्र. उ., ४.९):

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता
बोद्धा कर्ता विज्ञानात्मा पुरुषः ॥ (ख) ॥

आदिना गुणेन देहव्यापित्वञ्च श्रीगीतासु (भ. गी., १३.३३):

यथा प्रकाशयत्येकः कृत्स्नं लोकंइमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ (ग) ॥

आह चैव सूत्रकारः (ब्र. सू., २.३.२४):

गुणाद्वालोकवत् ॥ (घ) ॥

गुणनित्यत्वमुक्तम् वाजसनेयिभिः (बृ. उ., ४.५.१४):

अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मा ॥ (ङ) ॥

एवं साम्येऽपि वैषम्यमैहिकं कर्मभिः स्फुटम् ।
प्राहुः पारत्रिकं तत्तु भक्तिभेदैः सुकोविदः ॥ २ ॥

तथाहि कौथुमाः पठन्तिः

यथाक्रतुरस्मिँल्लोके पुरुषो भवति ।
तथेतः प्रेत्य भवति ॥ इति ॥ (क) ॥

स्मृतश्चः

यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ इति ॥ (ख) ॥

शान्त्याद्या रतिपर्यन्ता ये भावाः पञ्च कीर्तिताः ।
तैर्देवं स्मरतां पुंसां तारतम्यं मिथो मतम् ॥ ३ ॥

इति प्रमेयरत्नावल्यां जीवतारतम्यप्रकरणं नाम षष्ठप्रमेयम् ॥ १

Chapter 7

कृष्णप्राप्तिरूपमोक्षम्

अथ श्रीकृष्णप्राप्तेर्मोक्षत्वम् ।

यथा:

> ज्ञात्वा देवं सर्वपाशापहानिः ॥ इत्यादि (क) ॥ (श्वे. उ., १.१०)
> एको वशी सर्वगः कृष्ण ईड्यम् ॥ इत्यादि च (ख) ॥ (गो. ता. उ., पूर्व, २०)

बहुधा बहुभिर्वेशैर्भाति कृष्णः स्वयं प्रभुः ।
तमिष्ट्वा तत्पदे नित्ये सुखं तिष्ठन्ति मोक्षिनः ॥१ ॥

इति प्रमेयरत्नावल्यां कृष्णप्राप्तिरूपमोक्षप्रकरणं नाम सप्तमप्रमेयम् ॥१

Chapter 8

विशुद्धभक्तेर्मुक्तिप्रदत्वम्

अथैकान्तभक्तेर्मोक्षहेतुत्वम् ।

यथा श्रीगोपालतापन्याम्ः

भत्किरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन्
मनःकल्पनमेतदेव नैष्कर्म्यम् ॥ (क) ॥ (गो. ता. उ., पूर्व १४)

नारदपञ्चरात्रे चः

सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥ (ख) ॥

नवधा चैषा भवति ।

यदुक्तं श्रीभागवते (भा. पु., ७.५.२३-२४):

श्रवनं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ (ग) ॥

**सत्सेवा गुरुसेवा च देवभावेन चेद्भवेत् ।
तदैषा भगवद्भक्तिर्लभ्यते नान्यथा क्वचित् ॥१ ॥**

देवभावेन सत्सेवा यथा तैत्तिरीयके (तै. उ., १.११.२):

अतिथिदेवो भव ॥ (क) ॥

तया तद्भक्तिर्यथा श्रीभागवते (भा. पु., ७.५.३२):

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं
स्पृषत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं
निष्किञ्चनानां न वृणीत यावत् ॥ (ख) ॥

देवभावेन गुरुसेवा यथा तैत्तिरीयके (तै. उ., १.११.२):

आचार्यदेवो भव ॥ (ग) ॥

श्वेताश्वतरोपनिषदि च (श्वे. उ., ६.२२):

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ (घ) ॥

तया तद्भक्तिर्यथा श्रीभागवते (भा. पु., ११.३.२१-२२):

तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥
तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः ।
अमाययाऽनुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥ (ङ) ॥ (भा. पु., ११.३.२१-२२)

अवाप्तपञ्चसंस्कारो लब्धद्विविधभक्तिकः ।
साक्षात्कृत्य हरिं तस्य धाम्नि नित्यं प्रमोदते ॥ २ ॥

तत्र पञ्च संस्कारा यथा स्मृतौ:

तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः ।
अमी हि पञ्च संस्काराः परमैकान्तिहेतवः ॥ (ग) ॥

तापोऽत्र तप्तचक्रादिमुद्राधारणमुच्यते ।
तेनैव हरिनामादिमुद्रा चाप्युपलक्ष्यते ॥ ३ ॥

सा यथा स्मृतौ:

हरिनामाक्षरैर्गात्रमङ्कयेच्चन्दनादिना ।
स लोकपावनो भूत्वा तस्य लोकमाप्नुयात् ॥ ३अ ॥

पुण्ड्रं स्यादूर्द्ध्वपुण्ड्रं तच्छास्त्रे बहुविधं स्मृतम् ।
हरिमन्दिरतत्पादाकृत्याद्यतिशुभावहम् ॥
नामात्र गदितं सद्भिर्हरिभृत्यत्वबोधकम् ।
मन्त्रोऽष्टादशवर्णादिः स्वेष्टदेववपुर्मतः ॥
शालग्रामाअदिपूजा तु यागशब्देन कथ्यते ।
प्रमाणान्येषु दृश्यानि पुराणादिषु साधुभिः ॥ ४ ॥

नवधा भक्तिर्विधिरुचिपूर्वा द्वेधा भवेद्यया कृष्णः ।
भूत्वा स्वयं प्रसन्नो ददाति तत्तदीप्सितं धाम ॥ ५ ॥

विधिनाभ्यर्च्यते देवश्चतुर्बाह्वादिरूपधृक् ।
रुच्यात्मकेन तेनासौ नृलिङ्गः परिपूज्यते ॥ ६ ॥

तुलस्यश्वत्थधात्र्यादिपूजनं धामनिष्ठता ।
अरुणोदयविद्धस्तु सन्त्याज्यो हरिवासरः ।
जन्माष्टम्यादिकं सूर्योदयविद्धं परित्यजेत् ॥ ७ ॥

लोकसङ्ग्रहमन्विच्छन्नित्यनैमित्तिकं बुधः ।
प्रतिष्ठितश्चरेत् कर्म भक्तिप्राधान्यमत्यजन् ॥ ८ ॥

दश नामापराधांस्तु यत्नतः परिवर्जयेत् ॥ ९ ॥

कृष्णावाप्तिफला भक्तिरेकान्तात्राभिधीयते ।
ज्ञानवैराग्यपूर्वा सा फलं सद्यः प्रकाशयेत् ॥ १० ॥

इति प्रमेयरत्नावल्यां विशुद्धभक्तेर्मुक्तिप्रदत्वप्रकरणं नाम अष्टमप्रमेयम् ॥ ९

Chapter 9

प्रमाणत्रित्वम्

अथ प्रत्यक्षानुमानशब्दानामेव प्रमाणत्वम् ।

यथा श्रीभागवते (भा. पु., ११.१९.१७):

> श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् ॥ (क) ॥

प्रत्यक्षेऽन्तर्भवेद् यस्मादैतिह्यं तेन देशिकः ।
प्रमाणं त्रिविधं प्राख्यत्तत्र मुख्या श्रुतिर्भवेत् ॥ १ ॥

प्रत्यक्षमनुमानञ्च यत्साचिव्येन शुद्धिमत् ।
मायामुण्डावलोकादौ प्रत्यक्षं व्यभिचारि यत् ॥ २ ॥
अनुमा चातिधूमेऽद्रौ वृष्टिनिर्वापिताग्निके ।
अतः प्रमाणं तत्तच्च स्वतन्त्रं नैव सम्मतम् ॥ ३ ॥

अनुकूलो मतस्तर्कः शुष्कस्तु परिवर्जितः ॥ ४ ॥

तथाहि वाजसनेयिनः (बृ. उ., २.४.५):

> आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ॥ (क) ॥

काठकाः (क. उ., २.९):

नैषा तर्केण मतिरापनेया प्रोक्तान्येन सुज्ञानाय प्रेष्ठ ॥ (ख) ॥

स्मृतिश्च

पूर्वापराविरोधेन कोऽत्रार्थोऽभिमतो भवेत् ।
इत्याद्यमूहनं तर्कः शुष्कतर्कन्तु वर्जयेत् ॥ ४च् ॥

**नावेदविदुषां यस्माद् ब्रह्मधीरुपजायते ।
यच्चौपनिषदं ब्रह्म तस्मान् मुख्या श्रुतिर्मता ॥ ५ ॥**

तथाहि श्रुतिः (बृ. उ., ३.९.२६)

नावेदविन् मनुते तं बृहन्तम् ॥ इति ॥
औपनिषदं पुरुषं पृच्छामि ॥ (क) ॥

इति प्रमेयरत्नावल्यां प्रमाणत्रित्वप्रकरणं नाम नवमप्रमेयम् ॥ १

एवमुक्तं प्राचा

श्रीमध्वमते हरिः परतमः सत्यं जगत् तत्त्वतो
भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्
अक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥ १ ॥

**आनन्दतीर्थै रचितानि यस्यां
प्रमेयरत्नानि नवैव सन्ति ।
प्रमेयरत्नावलिरादरेण
प्रधीभिरेषा हृदये निधेया ॥ २ ॥**

**नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः ।
निरवद्यो निर्वृतिमान् गजपतिरनुकम्पया यस्य ॥ ३ ॥**

इति श्रीभगवत्कृष्णचैतन्यसम्प्रदायाचार्यश्रीमद्बलदेवविद्याभूषणकृता प्रमेयरत्नावली पूर्तिमगात् ।